# सन्देशः



**निवृत्तसंस्कृतप्राध्यापकः,**
**बेङ्गलूरुविश्वविद्यालयः, बेङ्गलूरु.**

महदिदं प्रमोदस्थानं यदस्मदीये कर्णाटकराज्ये संस्कृतविश्वविद्यालयः संस्थापित इति । बहुवर्षेभ्यः संस्कृतज्ञानां संस्कृताभिमानिनां च यः स्वप्नो वरीवर्ति, तस्मै साकारता दत्ता कर्णाटकसर्वकारेणेति मुख्यमन्त्र्यादिसर्वकारधुरीणेभ्यः साभिमानम् अभिनन्दनानि समर्प्यन्ते । सन्दर्भेऽस्मिन् भूतपूर्वकर्णाटकराज्यपालानां परमादरणीयानां रामेश्वरठाकूरमहोदयानां प्रेरणा न कदापि विस्मरणीया । तिरुपतिसंस्कृतविद्यापीठस्य भूतपूर्वकुलाधिपतयः डा. पञ्चमुखीमहाभागाः अयं जनश्चेत्यावयोः द्वारा कर्णाटकसंस्कृतवि॥विद्यालयस्य स्थापनाय अधिनियमं निर्माप्य ते एव मान्येभ्यः श्रीयड्यूरप्पमहोदयेभ्यः समर्प्य विश्वविद्यालयस्य स्थापनाय समादिदिशुः । तदारभ्य एतावत्पर्यन्तं यदभवत् तत्सर्वं सर्वैः विदितमेव ।
कर्णाटकराज्ये साम्प्रदायिकसंस्कृतशिक्षणस्य रक्षणाय बलवर्धनाय च संस्थापितोऽयं विश्वविद्यालयः साम्प्रदायिकशास्त्रैः सहेदानीं वृद्धिं गतान् अधुनातनविषयानपि शिक्षणक्रमे योजयित्वा अन्तर्विषयाध्ययनक्षेत्राण्यभिवर्धयतु नितरामिति संस्कृतज्ञा आशासते । घटकविद्यालयत्वेन संयोजितविद्यालयत्वेन वा स्वीकृतेषु संस्कृतमहाविद्यालयेषु कार्यरतानां, “अधीतिबोधाचरणप्रचारणैः” प्राप्तसिद्धिमतां च विदुषां तादृशानामेव नवीनानाम् अध्यापकानां च मार्गदर्शनेनाध्ययन–संशोधनयोरुभयोरपि क्षेत्रयोः संस्कृताध्येतॄणां प्रवर्धतां वैदग्ध्यवैभवमिति सदाशयमभिव्यज्य विरमामि ।

**डा. एम्. शिवकुमारस्वामी**